# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – आचार्यः-१ (SEM-2) | **प्रश्नपत्रम् – २** | गुणाः - ७० |
| विषयः – साहित्यम् | **CC-4.2.4** | समयः – ११ तः २ |
| दिनाङ्कः – १८/४/२०१६ | सन्दर्भग्रन्थः – काव्यप्रकाशः ७ तः १० | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **निम्नलिखितयोः एकं ससन्दर्भं वर्णयत ।** | ०४ |
| | (१) प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसन्धिहतवृत्तम् ।<br>न्यूनाधिककथितपदं पतत्पकर्षं समाप्तपुनरात्तम् ॥<br>(२) वक्त्राद्यौचित्यवशाद्दोषोऽपि गुणह् क्वचित् क्वचिन्नोभौ ॥ | |
| **प्रश्नः -२** | दोषसामान्यलक्षणं निरूप्य हति शब्दार्थदोषं तद्भेदांश्च लिखत ।<br>अथवा<br>मम्मटोक्तदिशा अर्थदोषान् प्रतिपादयत । | १२ |
| **प्रश्नः -३** | **अधोलिखितेषु द्वौ प्रश्नौ समाधेयौ ।** | ०४ |
| | (१) रसदोषाणां नामानि लिखत ।<br>(२) वाक्यगतदोषाः कति सन्ति ? के च ते ?<br>(३) अविमृष्टविधेयांशभाव दोषः कदा भवति ? | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः - ४** | **अधस्तनयोः एकं ससन्दर्भं विवेचयन्तु ।** | ०४ |
| | (१) उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेणजातुचित् ।<br>हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥<br>(२) गुणवृत्यापुनः तेषां वृत्तिः शब्दार्थयोर्मता ॥ | |
| **प्रश्नः -५** | गुणानां वर्णधर्मत्वं निराकृत्य व्यवस्थायपयत ।<br>अथवा<br>सलक्षणान् गुणभेदान् विलिख्य तेषां रसानुल्यं लिखत । | ०८ |
| **प्रश्नः -६** | **निम्नलिखितेषु त्रयाणाम् अतिलघुत्तराणिएकवाक्येन लिखत ।** | ०३ |
| | (१) शब्ददोषाणां कति भेदाः सन्ति ?<br>(२) के त्रयः काव्यगुणाः भवन्ति ?<br>(३) वामनमते कति गुणाः भवन्ति ?<br>(४) प्रसादगुणस्य किं लक्षणम् ?<br>(५) ओजगुणस्य किं लक्षणम् ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -७** | **निम्नलिखितयोः एकं ससन्दर्भं स्पष्टयन्तु ।** | ०४ |
| | (१) शाब्दस्तुलाटानुप्रासो भेदे तात्पर्यमात्रतः । | |

| | | |
|---|---|---|
| | (२) भेदाभावात्प्रकृत्यादेर्भेदोऽपि नवमो भवेत् । | |
| प्रश्नः -८ | अलङ्कारलक्षणं निरुप्य तस्य काव्ये प्रयोजनं प्रदर्श्यताम् ।<br>अथवा<br>उपमालङ्कारः सोदाहरणं ग्रन्थोक्तदिशा विवेचयत । | १२ |
| प्रश्नः -९ | **निम्नलिखितेषु द्वौ प्रश्नौ समाधेयौ ।** | ०४ |
| | (१) श्लेषस्य के अष्टौ भेदाः भवन्ति ?<br>(२) यमकालङ्कारस्य किं लक्षणम् ?<br>(३) रूपकस्य किं लक्षणम् ? | |
| | **चतुर्थान्वितिः - ४** | |
| प्रश्नः -१० | **निम्नलिखितयोः एकं ससन्दर्भं विवेचयत ।** | ०४ |
| | (१) धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते ।<br>(२) स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् । | |
| प्रश्नः -११ | अलङ्काराणां परस्परभेदकता प्रदर्श्यताम् ।<br>अथवा<br>अधोलिखितालङ्काराणां लक्षणोदाहरणानि ग्रन्थोक्तदिशा लिखत ।<br>(१) समासोक्तिः (२) निदर्शना (३) विशेषोक्तिः । | ०८ |
| प्रश्नः -१२ | **अधोलिखितेषु त्रयाणाम् उत्तरं लिखत ।** | ०३ |
| | (१) पूर्णोपमायाः कति भेदाः ?<br>(२) अप्रस्तुतप्रशंसा-अलङ्कारः कदा भवति ?<br>(३) दृष्टान्तस्य किं लक्षणम् ?<br>(४) दीपकालङ्कारस्य किं लक्षणम् ?<br>(५) विरोधस्य किं लक्षणम् ? | |

***